PAPER - 3

# MT

2017 .... .... 1200

Seat No. | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II**
**PAPER - III**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

कबड्डीक्रीडा तुकाराममहाराजस्य ........ निर्दिष्टा । (प्रार्थनावचनेषु / अभङ्गवचनेषु)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

कबड्डीक्रीडायाः महत्त्वपूर्णं वैशिष्ट्यं किम् ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

कबड्डीक्रीडायां सप्त क्रीडापटवः बहिः तिष्ठन्ति ।

प्राचीनकालतो विविधाः क्रीडाः प्रचलिताः । काश्चित् साङ्घिकाः काश्चिच्च वैयक्तिकाः। साङ्घिकक्रीडासु कबड्डी इति भारतीया क्रीडा महाराष्ट्रराज्ये विशेषरूपेण लोकप्रियतां गता । 'हुतुतू' इति तस्या अपरनाम । तुकाराम-महाराजस्य अभङ्गवचनेषु एषा क्रीडा 'हमामा, हुंबरी, हुतुतू' इत्यादिभिः नामभिः निर्दिष्टा । बङ्गदेशे 'हुडू', दक्षिणभारते चेडुगुडु, उत्तरभारते 'कबड्डी' इति नाम्ना विख्यातैषा क्रीडा । अस्यां क्रीडायां प्रतिसङ्घं द्वादश क्रीडापटवः भवन्ति। क्रीडाङ्गणे तु सप्त क्रीडापटव एव खेलन्ति । पञ्च क्रीडापटवो बहिस्तिष्ठन्ति । एष क्रीडाप्रकारो न केवलं पुरुषाणाम्, अपि तु महिलानां कृतेऽपि प्रचलितोऽस्ति । अनया कबड्डी-क्रीडया शरीरचापल्यम्, उत्साहः, आक्रमकत्वं, स्वसंरक्षणवृत्तिः, शरीरसौष्ठवं च लभते । साहसं, निरीक्षणशक्तिः, योजकत्वं, निर्णयक्षमता, साङ्घिकी भावना, एकात्मता, देशाभिमानश्चैतैः नैकैर्गुणैः क्रीडकस्य व्यक्तित्वं विकसति । एतस्यै क्रीडायै कस्यापि क्रीडासाधनस्यावश्यकता नास्तीति महत्त्वपूर्णं वैशिष्ट्यमिति ।

**२. स्वमतप्रकटनम् ।** २

भवतः / भवत्याः प्रियक्रीडाप्रकारविषये ३० / ४० शब्दपरिमितां संज्ञापनं लिखत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

........ न अवलोकितं यत् शाकविक्रेता परिमाणस्थाने पाषाणखण्डं योजयति । एतत् ........ । (मधुरया / मात्रा) (विधियुक्तम् / न विधियुक्तम्)

(ii) कः कं वदति । १

अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय ।

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

मधुरया रङ्गमञ्चः इति शब्दः श्रुतः ।

| | |
|---|---|
| माता | - मधुरे, सत्यं वदसि । नावलोकितं मया । किं रे, तव समीपे घएध चिह्नाङ्कितानि परिमाणानि न सन्ति ? परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं न विधियुक्तम्। तुलायाः दण्डोऽपि त्रुटितः । अतः वस्तूनां तोलनमपि सम्यग् न भवति । जानासि किम् ? यदि ग्राहकमञ्चमभिगच्छामि तर्हि शाकविक्रय - अनुज्ञापत्रादपि त्वं वञ्चितो भवसि । |
| मधुरा | - कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः । |
| माता | - ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (१९७४) संवत्सरे स्थापिता एषा संस्था । 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते । |
| द्वितीयः शाकविक्रेता | - यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि शाकविक्रेता ग्राहकन्यायालयं गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय । |

२. **पृथक्करणम् ।** २

**मञ्जूषातः शुद्धं उत्तरं चित्वा जालरेखाचित्रं पूरयत ।**




(वस्त्रस्यूतस्य उपयोगः, तुलादण्डः त्रुटितः, वस्तूनां सम्यक् तोलनम्, परिमाणस्थाने पाषाणाः)

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) चतुर्थपदं लिखत । १

रुग्णः : रोगी :: भेषजम्: ........ ।

(ii) मञ्जूषातः उचितं विशेष्यं चित्वा रिक्तस्थानपूर्तिं कुरुत । १

द्वितीये ........ । एकम् ........ ।

(युवानौ, शान्तचेतसम्, दिने, वस्तु)

(iii) गद्यांशात् द्वे धातुसाधित-त्वान्त-अव्यये चित्वा लिखत । १

एकदा राजानं गत्वा नागार्जुनः प्रार्थयामास, ''महाराज, कार्यबाहुल्याद् मत्कृते सहायकस्य आवश्यकता वर्तते ।'' एतच्छ्रुत्वा द्वितीये दिने एव तं प्रति महाराजः द्वौ युवानौ प्रेषितवान्। तौ परीक्षितुं नागार्जुनः उभाभ्यामपि एकैकं वस्तु दत्त्वा अवदत्, ''इदं गृहीत्वा स्वगृहं गच्छतम्। श्वः तस्मात् किमपि रसायनम् औषधं वा निर्मीय आनयतमिति ।'' अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ । तदा तयोरेकः उक्तवान्, ''महाशय, अहं रसायनं कृत्वा आनीतवान् । पश्यतु भवानिति ।'' द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं, ''कथमिदानीम् अभाषमाणः तिष्ठसि ? किं त्वया नानीतं रसायनम् ?'' तदाकर्ण्य स मन्दस्वरेण अगदत्, ''आचार्य, ह्यः गच्छन्तौ पथि आवामेकं रुग्णमपश्याव । तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान् । तस्य समीपे स्थित्वा सेवां कृतवान्। अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति ।''

२. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) मार्गे रुग्णदर्शनम् ।

(ii) राज्ञः युवकप्रेषणम् ।

(iii) परीक्षार्थं युवकाभ्यां वस्तुप्रदानम् ।

(iv) नागार्जुनस्य कार्याधिक्यम् ।

**द्वितीयः विभागः - पद्यम् ।**

**प्र.२ अ)पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम् ।
रसायनमिव प्राज्ञैर्हेलया न कदाचन ।।१।।
माऽस्तु धनं मौक्तिकं काञ्चनम् अस्तु अविरतं तव प्रसादनम् ।
त्वत्स्पर्शाद् मे भवतु सुवर्णं गुरुचरणाभ्यां सदा वन्दनम् ।।२।।

१. **शब्दज्ञानम् ।**

भिन्नार्थकं शब्दं चिनुत । १

१) धनम्, काञ्चनम्, वित्तम्, अर्थम् ।  २) रसायनम्, औषधम्, प्रसादनम्, भेषजम् ।

२. **पृथक्करणम् ।** २



**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

समूलशाखान् पश्यामि निहतान् कायिनो द्रुमान् ।
युष्माभिरिह पूर्णाभिर्नद्यस्तत्र न वेतसम् ।।१।।
अकायश्चाल्पसारश्च वेतसः कूलजश्च वः ।
अवज्ञया वा नानीतः किं च वा तेन वः कृतम् ।।२।।
तिष्ठन्त्येते यथास्थानं नगा ह्येकनिकेतनाः ।
ते त्यजन्ति ततः स्थानं प्रातिलोम्यान्न वेतसः ।।३।।

१. **अवबोधनम् ।**
पूर्णवाक्येन उत्तरत । १
सागरः नदीषु कान् पश्यति ?

२. **स्पष्टीकरणम् ।** २
वृक्षेभ्यः वेतसः कथं भिन्नः इति माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् । श्लोकपूर्तिं कुरुत । (केवलं १ श्लोकः लेखनीयः ।)** २

(i) शस्त्रैर्हतास्तु ....... हन्ति ।।
(ii) अतिथि० ....... स्वशक्तितः ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | | |
|---|---|---|
| (i) | गुरुचरणाभ्यां सदा वन्दनम् | एतत् प्रज्ञानलक्षणम् । |
| (ii) | साम्नैव यत्र सिद्धिर्न | शाम्यति कोऽर्थः पटोलेन । |
| (iii) | संश्रयेत् वैतसीं वृत्तिम् | कदापि मा भूत् ते विस्मरणम् । |
| (iv) | पित्तं यदि शर्करया | तत्र दण्डो बुधेन विनियोज्यः । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | सप्तमी एकवचनम् | प्रथमा बहुवचनम् | द्वितीया द्विवचनम् |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(पथि, युवानः, आवाम्, भवन्तः, वाचौ, अस्मिन्)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(अपश्याव, प्रार्थयामास, गच्छतम्, सन्ति, भवेयुः, करिष्यामः)

इ) **समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**कोष्ठकपूर्तिं कुरुत ।**

| | समस्तपद | विग्रहः | समासनाम |
|---|---|---|---|
| (i) | निषिद्धाचरणम् | .................. | कर्मधारय समास |
| (ii) | पर्णबद्धानि | पर्णैः बद्धानि । | .................. |
| (iii) | कुम्भकारः | .................. | उपपद तत्पुरुष समास |
| (iv) | स्रजकरकौ | स्रक् च करकः च । | .................. |
| (v) | निराश्रयाः | .................. | प्रादि बहुव्रीहि समास |
| (vi) | पञ्चवटी | पञ्चानां वटानां समाहारः | .................. |

ई) **उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) ......... परितः गोपिकाः वर्तन्ते । (कृष्णं / कृष्णस्य / कृष्णाय)

(ii) ......... नमः । (विष्णुं / विष्णवे / विष्णोः)

(iii) ......... कृते स्वच्छता-अभियानम् । (आरोग्यात् / आरोग्याय / आरोग्यस्य)

(iv) हे ईश्वर ! ......... बुद्धिं यच्छ । (अस्मभ्यं / मां / अस्मान्)

(v) ......... ऋते जीवने आनन्दः नास्ति । (सङ्गीतस्य / सङ्गीतात् / सङ्गीतेन)

(vi) राजा ......... स्निह्यति । (प्रजासु / प्रजाः / प्रजाभ्यः)

उ) **सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) तदाकर्ण्य = तत् + ......... ।

(ii) विख्यातैषा = ......... + एषा ।

(iii) ......... = नैकैः + गुणैः ।

(iv) एकोऽपि = ......... + अपि ।

(v) ......... = असौ + अनुचितः ।

(vi) वाग्धारा = वाक् + ......... ।

ऊ) **सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) पुनः ......... अर्जुनः तमेव वनप्रदेशं प्राविशत् । (once)

(ii) ......... मित्रयोः न्यायशास्त्रं प्रियमासीत् । (2)

(iii) शाकुन्तलस्य ......... अङ्कः अतीव सुन्दरः अस्ति । ($4^{th}$)

(iv) प्राचीनभारते ......... वर्णाः आसन् । (4)

(v) श्रावणमासे ......... तिथौ कृष्णजन्म भवति । (8)

(vi) कबड्डीक्रीडायां सातत्येन ......... सुवर्णपदकं प्राप्तम् । (thrice)

**चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

अ) **वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| अहं | गुणवत्तां | कामये ।/ कामयसे ।/ कामयते । |
| त्वं | वक्तुं | करोमि ।/ करोषि । / करोति । |
| सः | प्रशंसां | लभे । / लभसे । / लभते । |
| सा | प्रयत्नान् | न इच्छामि ।/न इच्छसि ।/न इच्छति । |

आ) **परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

अहमेको छात्रोऽस्मि । मम ...... प्रहर्षोऽस्ति । अहं दिल्लीनगरस्य एकस्मिन् प्रतिष्ठिते विद्यालये दशम्यां कक्षायां पठामि। मम विद्यालयः चतुर्दिक्क्षेत्रे ...... अस्ति। अहं स्वगृहात् प्रातरेव सप्तवादने विद्यालयस्य वाहनेन पठितुं गच्छामि । वाहने अन्येऽपि मम ...... मिलन्ति, यैः सह मनोरञ्जनं कुर्वन्नहं विद्यालयं गच्छामि । मम विद्यालये देशस्य प्रसिद्धाः नेतारः, क्रीडकाः, अभिनेतारः, वैज्ञानिकाः अपि ...... समागच्छन्ति, स्वजीवनविषये च छात्रान् बोधयन्ति ।

( यथासमयम्, अभिधानं, सहपाठिनः, प्रसिद्धः)

**Best of Luck**